# Shri Surindratirtha Stutyashtakam

# श्रीसूरीन्द्रतीर्थस्तुत्यष्टकम्

## Document Information

Text title : Surindratirtha Stutyashtakam

File name : sUrIndratIrthastutyaShTakam.itx

Category : deities_misc, gurudev,aShTaka

Location : doc_deities_misc

Author : Vadirajacharya R. Panchamukhi

Transliterated by : Sudeep Dalbanjan

Proofread by : Sudeep Dalbanjan

Latest update : August 21, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 21, 2024

*sanskritdocuments.org*

# श्रीसूरीन्द्रतीर्थस्तुत्यष्टकम्

(अर्थालङ्कारभूयिष्ठा)

रूपकालङ्कारः-

श्रीसूरीन्द्रगुरुः सुराहितसरुः सूरीढ्यशास्त्रम्भरुः
दुस्सूराग्र्यतमोऽप (सा)हारसुचरुः सूराभसूरन्धरुः ।
सीरोत्कर्षणजातजानिमजनिं संसारनिस्सारकं
संसृत्याश्रितसूरसारसुगुणान् संसेवकान्वपात्वलम् ॥ १॥

उत्प्रेक्षालङ्कारः -

श्रीसूरीन्द्रगुरोः सुकीर्तिसरितः स्तोतोऽतिशेते परं
त्रिःस्रोता नु बिभेति सीदनमलं तस्याश्वसन्तोलने ।
निःस्यन्दः सुयशोधुनीवहगतो व्याप्नोति भुमण्डलं
गाङ्गौघो नियतं भुवं प्रसरतीत्याहो परं विस्मयम् ॥ २॥

अतिशयोक्त्यलङ्कारः

गौतम्यो वरराघवेन्द्रमुनिपो मान्त्रीं ऋषीणां वशां
गामामोचयदेव मृत्युमुखतो गोसन्ततेः पोषणात् ।
वेदान्तोपनिषत्प्रमेयविसरं संसाधयन्नित्यशः
वेदव्यासपदं समाहितवतः भक्तप्रशिष्यो मुनिः ॥ ३॥

विरोधभासालङ्कारः

स्वर्गेशस्य सभासुकान्तिनिकरं निर्जित्य विद्यासभा
श्रीसूरीन्द्रगुरोस्तु भूमिविबुधैः सम्पादिता शोभते ।
स्वर्गीयैस्तु सुधासुपानविततेः संसाध्यते नैर्जरं
मुक्तिर्वैतु फलं विचारमथने विद्वत्सभासाधिते ॥ ४॥

तुल्ययोतितालङ्कारः -

कल्पद्रुः स्वकबीजवाहनविधामाश्रित्य जान्यं द्रुवं
सम्पाद्यात्मपरम्परां नु जनयेदित्येव मान्या गतिः ।

श्रीसूरीन्द्रगुरुश्च कल्पतरुरित्याव्यानमान्यं गुरुं
स्वीयं प्रेष्ठगुरुं प्रपद्य रुचिरं ह्याप्नोच्चसारूपताम् ॥ ५॥

व्यतिरेकालङ्कारः -
श्रीसूरीन्द्रगुरुः सुरेन्द्रविभवश्चाध्यात्मसम्पद्गुरुः
ऐन्द्री वैभवराशिरल्पसमया जाध्यात्मभूतिः परम् ।
शश्वत् सौख्यपरा सुसाधनफला सुज्ञानयज्ञैर्दृढा
सच्छ्रीराघवपादसेवनफला सद्राघवेन्द्राश्रया ॥ ६ ॥

हेतुमालालङ्कारः -
श्रीसूरीन्द्रगुरो कृपा जनयिता सद्राघवेन्द्रे रतिं
सा भद्रं जनयेद्रतिं वरगुरोः सच्छास्त्रपारायणे ।
ज्ञानाढ्ये सति साधके भगवतः सत्प्रीतिमाप्येत हि
प्रीत्या तोषततिं सुसाधितवतो धन्यत्वमाशास्यते ॥ ७॥

विरोधाभासालङ्कारः -
श्रीसूरीन्द्रगुरुः सुराधिपनुतः सत्कल्पवृक्षाश्रयः
सूरीणां रुचिरं मनोभिमतमाढ्यं ह्याशु चाश्राणयेत् ।
सद्याञ्चामनुसृत्य वर्धयति कामं चैव कल्पद्रुमः
मौनीन्द्रश्चहृदि स्थितं दिशति सद्भिर्वै सदा शंसितः ॥ ८॥

पञ्चमुख्यभिधाभाजा राघवेन्द्रार्यसूनुना
वादिवाजेन रचिता श्रीसूरीन्द्रगुरुस्तुतिः ॥ ९॥

इति श्रीसूरीन्द्रतीर्थस्तुत्यष्टकं सम्पूर्णम् ।

रचयिता ः वाचस्पति। डॉ वादिराजाचार्य। रा. पञ्चमुखि कुलपति,
श्रीगुरुसार्वभौम संस्कृतविद्यापीठ, मन्त्रालय

Encoded and proofread by Sudeep Dalbanjan

*Shri Surindratirtha Stutyashtakam*
pdf was typeset on August 21, 2024

Please send corrections to *sanskrit@cheerful.com*